डीस्वर इति ज्ञेयः प्राणिनां सम्भावस्तत्रार्थः १ नाडीस्वरप्रयोजनमुपदर्शयन्नाह श्लोक चपलैः कातरो मर्त्यः कपणांश्च वि

तेंद्रियः असत्यबहुभाषीच जातोबालस्वरोदये २ व्यवसायीकलाभिज्ञः स्त्रीरतः सुभगः सदा दीर्घायुर्विग्रही मूढः कुमारो 27
श्री दयसंभवः ३ सर्वलक्षणसंपूर्णोराजाभवतिधार्मिकः सर्वकालजयीयुद्धे शिशुर्जातो युवोदये ४ स्त्रीजितोधार्मिकः का
न०प० मीविवेकीस्थिरसाहसः सत्यवादी सदाचारः पुमान्वृद्धोदयोद्भवः ५ लोभी संवत्सरः क्रूरोनिष्कामोविकलेंद्रियः सर्व
ज०टी० कालालसोदुष्टोजन्मयस्यमृतोदये ६ ब्रह्मयामले तात्कालिकस्वरचक्रे जातकस्वभावशुभनिर्णयः टीकं तिथिस्वोदये
२८ यदवशिष्यते तदंतरोदयस्वरे वानाजो स्वरादिकबाले लादिस्वरे श्लोकपंचकं व्यक्तार्थमेवकथितमस्ति ६ श्लोक ककारा चपलतिर
दिदकारांताः पंचहस्वस्वरालया बलिनः स्थिसितेपक्षेशेषाः सर्वेसितेतरे ७ टीका ककारादिदकारांतास्तथापंचहस्व
श्लोक स्वराः अइउएओ शेषाधादिहांता आईऊऐऔ एएकःस्वरः पृथग्वर्णः पक्षयोरुभयोर्यदि तत्रपक्षबलंग्राह्यं शुक्लकृ
ष्णविभेदतः ८ टीका एकोयत्रोभयोः स्वरएकः पृथक्पृथगक्षरः शुक्लकृष्णयोर्वर्णोनामादौ भवति तत्रपक्षबलंग्रा
ह्यं शुक्लकृष्णविभेदतः यथाकमलकल्लोलयोरेकोकारोवर्णःस्वरः ककारः कृष्णपक्षेधकारः शुक्लपक्षेलीतिएवंप
क्षयोः शुक्लेपीरोपराः कृष्णेयुद्धेजयतिनिश्चितं ६ टीका द्वयोर्योधयोः एकः पक्षांतरे नामादिवर्णस्वरस्थेति तदा शुक्ल
पक्षेगौरवर्णो जयी कृष्णपक्षे कृष्णवर्णो जयीयथा कमलकोगौरवर्णः तस्यश्यामवर्णः स्वरस्त्वोभयोरकारः पक्षकं राम
चएकत्र कमलकोगौरतेनशुक्लपक्षेजयीतस्यश्यामवर्णः सकृष्णपक्षेजयी ६ श्लोक अस्मिन्नेकस्वरः गौरो हस्वो १४
वाभयोर्यदि स्वरासन्नास्वरो हस्वो दीर्घो दूरास्वरोजयी १० टीका अस्मिन्नेकपक्षासेयोधयोरेकस्वरः गौरो हस्वोवा
हस्वोदीर्घोवाभवति तत्रहस्वोपः सवर्णस्वरचक्रे स्वरासन्नास्वरः समस्तदाजयीभवति पक्षयदीर्घोयदिसस्वरादू

रद्धरस्तदा जयी भवतीत्यर्थः १० श्लो० पुमाख्ये नामवर्णैक्यं पुत्रकारकयोर्यदि तत्पुष्टे बलं देयं यायिस्थायिविभेदतः ११ 28
टीका प्रमाणं हस्तादिना यथा ख्यावर्णा गोपादि तेषामैक्यं समतायोधयोर्भवति तत्रयायिस्थायिविभेदतो पुष्टे बलं देयं ए
तदेव व्यक्तीकृत्य व्यवस्था यदि ११ श्लो० योधयोः सर्ववर्णैक्ये सो यूनि कुमारके जयी यायी तथा स्थायी बाल वृद्धान्तिमस्वरे १२ टीका
योधयोः सर्ववर्णैक्ये सर्वभेदेन प्रमाणादिना पूर्वश्लोकोक्तेनैक्ये समतायां यूनि कुमारके योधस्वरे उदिते सति यायी प्रथमोदितो
जयी जयवान् तथा तेनैव प्रकारेण बाले मृते च स्वरे स्थायी प्रतिबादी जयी भवति बालतिथित्रयोपरि स्थित स्वरान्तरेषु भेदे
न तिथिप्रत्येकं बलमुपदर्शयति १२ श्लोक आद्यौ तिथेस्त्रयो वर्णो द्वौ वर्णौ शेषयोर्मतौ एवं तिथित्रयं तेषं वर्णसंख्या तिथि
स्वरे १३ टीका। प्रतिपतिथ्येकादशीनामुपरि स्वरा भवन्ति तेषामाद्यतिथयो बालाख्या स्वराद्ये तिथौ प्रतिपदित्रयो
वर्णा अकारककारडकारा एवं षष्ठ्येकादश्योर्द्वौ वर्णौ भवतः षष्ठ्यां उकाधकारौ एकादश्यां भकारवकारौ एवं तिथिस्वरे।
तिथिवर्णस्वरा ज्ञेयाः १३ श्लोक वर्णतिथ्यादितिथ्याख्या जन्मह्रानिर्मृतिस्तथा श्रीजेन्मनि रुजा हानौ मृतौ मृत्युर्न संशयः १४
टीका एवं यस्या तिथेर्यो वर्णः सा तिथिर्भवति तदानुक्रमेणतिथित्रयस्य जन्महानिर्मृतिस्तथेति नामत्रयं यथा ककारएव प्रति
पज्जन्मना स्त्रिरति स्वरोदयटीकायां स्वरप्रकारनिर्णयः डोल्कस्मिन्दिने पुरुषस्य किंफलं स्यादिति स्वरभेदेन विचारयन्नाह १४ श्लो०
यदुक्तं यामले तन्त्रे गुरुत्तानप्रसादतः स्वरादीनां फलं बक्ष्ये पुंसां कर्मप्रकाशकं १ टीका तदहं दिनफलं स्वरादीनां स्वराञ्चका।
दयः मात्रास्वरा स्तेषां फले दिनफले पुंसां बक्ष्ये कीदृशं कर्मप्रकाशकं पुंसां मिस्तुफलदर्शनं अन्येषामपीति यद्यामले गुरु
प्रसादतो गुरूपदेशतो ज्ञातं तत्प्रकारमुपदर्शयति [illegible] श्लोक योगपिंडं स्वरा श्चाख्यजीवरवेतन्तरस्वरान् उत्पाद्यता
मतस्तास्तो मात्रांता स्थापयेत्क्रमात् २ टीका योस्वराः पिंडस्वराः नक्षत्रस्वराः राशिस्वरा जीवस्वराः ग्रहस्वराः वर्णस्वराः मात्रांतान्
गा

श्री०
स० प०
स० टी०
१५

मात्रास्वरांतान्नामतआयाद्यस्यापयेत् तिर्यक्पंक्तिक्रमेणलिखेदित्यर्थः २ श्लोक तस्याधस्तालिखेच्चाष्टौ द्वादशाब्दिकान्स्वरा 29
न् स्वभोगेनसमायुक्तान्भोगश्चैकादशांदकः ३ यथोत्तरबलाः सर्वेतथा कालबलान्वितः कालोदयाः स्वराश्चापि ज्ञातव्याः स्वरवे
दिभिः ४ टीका तस्ययोगस्वरस्याधस्तात् द्वादशाब्दिकालमानं द्वादशाब्दिकवार्षिकअयनऋतुमासपक्षदिनघटीसंभवान्
अष्टौस्वरान् आदौलिखेत् कथंभूतान्स्वभोगेनसमायुक्तान् स्थूलक्रमेणांतरोदयमानेनचविशेषसहितान् भोगमानमाह
भोगश्चैकादशांशकः स्थूलमानेनप्रत्येकमेकादशभिर्योभोगः प्राप्यतेवर्षादिकेयस्मिन्सोभोगोभुक्तिरित्यर्थः यथाद्वाद
शवार्षिकेवर्षमेकं मासोदिनद्वयं लोकश्चिनाडिकाच अष्टत्रिंशत्पलानिचभोगादि यथाष्टानांकालजातांमिति अत्रैवभोग
स्वरादिकानामष्टस्वराणां स्वरादिकस्वरनामादिग्रवस्था २ स्वरवेदिभिरेतेस्वरा यथोत्तरबलाज्ञातव्याः केतेयोगादिमात्रांताः
अष्टौनामतउत्पादिताः तथातेनैवप्रकारेण कालोदयाश्चापिद्वादशाब्दादिघटीपर्यंताः संयोजितायथोत्तरबलाज्ञातव्याः यथा
योगस्वरात्पिंडस्वरोबली इत्यादिक्रमेण स्वरबलंज्ञातव्यमित्यर्थः ४ श्लोक अकारादिस्वराधःस्याद्वेदवेदप्रमाणकाः विन्यस्य
क्रमयोगेनतेनविशोधकामताः ५ योगाद्द्वादशवर्षस्युरवस्थाः पिंडतोद्व्यके भस्वरादयनेज्ञेयाराशिस्वरादृतुस्वरे ६ टी
का अकारादिक्रमात् अइउएओ अधोलिखितादधस्ताद्वेदवेदप्रमाणकाः चतुःसंख्याः विन्यस्य स्वरोविशोधकामताः लोक
तात्स्वर्थः प्रयोजनंचतस्य अष्टस्वरेषुप्रत्येकमतएवचतुःसंख्याविन्यासः शुभाशुभकोष्ठेषुविधातव्यपूर्वप्रतिज्ञाता
नोमात्रांताष्टस्वराणां द्वादशाब्दादिकालजानांबालादिकावस्थाः कृष्टयेरुक्ताः उक्तस्याचिंतनेयेत्याह योगादितियोगाख्यो
गस्वरात् बालभूतात् द्वादशवर्षेऽवस्थाः स्युः अयमर्थः द्वादशवार्षिकेपः स्वरोऽकारादिषुउदितः सयोगस्वरोनामस्वरमु
वधीकृत्य बालःकुमारोय[illegible]दवृद्धोमृतइति एवमग्रेपिसर्वावस्थाः कथिताः यथापिंडस्वरात्वर्षकेषुअवस्थानसत्वादिस्वरो

राम
९५

दयिनेराशिस्वरादृतस्वरेवस्थानेयेत्यर्थः ६ श्लोक जीवाख्यामस्वरेवस्था गृहाख्यस्तस्वरेतथा वर्णो दिनस्वरेज्ञेया मात्रास्वरा
दुदीस्वरे १ द्वादशाद्वादिकः कालोयत्राकारादिकस्वरे स्थितस्तत्र शुभोनस्यात्पंचा वस्थाशुभोपिवा ८ टीका जीवस्वरा
ख्यास्वरेवस्थांज्ञातव्या गृहस्वराख्यस्वरे चिंतनीया वर्णस्वरादिनस्वरेज्ञातव्या उदीस्वराख्यमात्रास्वरे मासेनादिक्रमेणदि
नचर्याया कथितप्रकारेण शुभराशिरवशिष्यते तदपशुभोनस्यात् यदिवापंचावस्थाशुभः पंचस्ववस्थास्वशुभः शुभग्र
होनशुभः शुभग्रहोनस्यात् तदाफलंवाच्यं अथश्लोकक्रमेणाभिप्रायः यथाबालादिकस्वरोतरोदयगतस्तेषामधःस्थरा
शिः पतति शुभः शुभस्तत्तदुपरिस्थितस्वरेषुविंशोपकान्परिकल्प्यशुभाशुभकोटिद्वयंकृत्वा हि एवंसत्यस्य बहुल
पतनात् परिशेषंयदि शुभग्रहस्वराशिस्तदाशुभमन्यथा १ शुभमितिसामान्यतोज्ञातासिंशभेत्यादिक्रमेण वर्तमानंस्वरं
निरूप्यतदधःस्थग्रहवशेनफलंवाच्यं यदिपरिशेषोऽशुभग्रहकोटिः त्रिंशत्येत्यादिक्रमेण अशुभकोटिस्तदाविंशकफलं
वाच्यंलाभालाभौमृत्युधातुमूलजीवाधिपत्यग्रहवशेनतद्द्रव्याणांस्वभावश्चिंतनीयोत्पत्तिप्रकारेणप्रश्नाश्चिंतनीयइति ८ श्लो
स्वरोबुद्धांतिमोदुष्टोबालपूर्वदलेतथा शेषंसार्धद्वयंभ मितिज्ञेयंशुभाशुभं ८ द्वादशाब्दिकविज्ञेयाः सांतरोदयसंस्थि
ताः तेशुभाएकतःस्थाप्याश्चाशुभास्त्वन्यथापृथक् ११ शुभाशुभस्वरूपस्वराशियुग्मस्यमध्यतः एकस्मात्पतितेशेषेज्ञेयंतद्भिन्नं
फलं ११ टीका प्राग्उक्तदिनफलज्ञानार्थंबालादिपुत्रमस्याह स्वराविति बुद्धांतिमोवृद्धस्वरमृतस्वरौदुष्टोनिषिद्धफलदौ
ज्ञात्याविपर्ययः तथाबालपूर्वदलेबालस्वरप्रथमार्धं तु एकफलमित्यर्थः शेषंसार्धद्वयंबालोत्तरार्धसहितकुमारयुवानौमृत्युः
शुभफलप्रदंतत्यनेनप्रकारेणशुभाशुभंज्ञेयं ६ द्वादशेतिसांतरोदयसंस्थितायेशुभाद्वादशवार्षिकाद्याश्चएतेतेशुभाअपा
रत्रशुभाःबालपूर्वार्धेवृद्धमृतस्वराविंशोपकाःस्थाप्याः विंशोपकाःप्रत्येकंकुमारादीनांचत्वारःराशिमिश्रतेनोभयत्र

स्वी०
न० प०
नं० टी०
१६

द्विसंख्याः बालोत्तरार्धे कुमारयुवानः स्वविंशोपसंख्यासहिता एकतः अपरत्र पुनः प्रथमभागार्धसमये शुभे द्विसंख्यापंचवि ३१
भाजिते स्यनेकपावलस्त्र चततः पंचाशच्च भागोग्राह्य इति १० शुभाशुभमस्वरूपराशिमध्यतः स्वल्पस्य बहुलया तनास्य विंशोपं
११ श्लोक विंशत्याताडिते शेषे चततः षष्ट्या द्विभाजिते लब्धं विंशोपका स्वरशुभाशुभप्रकाशकाः १२ योगेस्वकर्मतः पिंडे
शरीराद्वे स्वहजननात् राशौ स्वकुलतो जीवे स्वविज्ञात् हृदंतो रिपौ १३ वर्णे स्वस्वमितो ज्ञेयं मात्रायां स्त्रीजनेनाफले एवं नामावदे
द्विद्वांदिने फलं शुभाशुभं १४ टीका विंशत्याताडिते गुणिते चततः षष्ट्या विभाजिते हृते भागे लब्धं यत्ततत् एते यां मध्ये विभाजिते ये
लब्धं ते शुभाशुभप्रकाशकाः यथा एकलाभे योगतो लाभः द्विलाभे पिंडतः एवमष्टपर्यंते नमात्रांतां स्फलेन तत्कथितमिति
पंचस्वरेषु प्रत्येकं चततः स्वरसंख्या विन्यासाद्विंशतिसंख्या भवंति ते न विंशत्या गुणने योगादि मात्रांतस्वराणामष्टसंख्या
द्वादशाष्टादिकानामष्टसंख्याष्टानामष्टभिर्गुणनं चततः षष्टिसंख्या भागहारक इत्यभिप्रायः योगादिसंख्यालाभे एका
दिक्रमेण कुतः फलं स्यादित्याह १२ योगेति योगे लब्धे स्वकर्मतः स्वव्यापारात् पिंडे द्विसंख्यालाभे शरीरात्स्वकीयादेव मेन
लब्धे त्रिसंख्यातो लब्धे स्वहजननात् राशौ चततः संख्यातो लब्धे स्वकुलतः स्वकुलजनात् जीवे पंचसंख्यातो लब्धे स्वविज्ञात्
गृहे षट्संख्यालब्धे रिपोः शत्रोः सकाशात् वर्णे सप्तसंख्यातो लब्धे स्वस्वामितः मात्रायामष्टसंख्यातः स्त्रीजनात् शुभम
शुभं वा भवति सामान्यप्रकारमाह अर्थव्यक्तीकरणीयं लिख्यते एवमनेनप्रकारेण विद्वान् इति शुभाशुभफलं जा राम
ताबदेत् १४ श्लोक कथितस्वरनिर्णयस्य सकलाक्षेयस्योपयोगितामुपदर्शयति गुह्याद्गुह्यतरसारभूतं काशंप्रकाशि १६
तं स्वरोदयमिदं ज्ञानं ज्ञानिनां मस्तके मणिः १५ स्थूला [illegible] बोधं स्वल्पप्रयत्नं आश्चर्यं कालिके लोके प्र
धारमस्त्वके जने १६ दुष्टेच दुर्जने स्वरे श्रसत्ये गुरुतल्पगे हीनसत्वे दुराचारे स्वरज्ञानं न दीयते १७ शांते शुद्धे सदाचारे गुरुभ

त्रिसमन्विते ह्रद्वचिन्हं ज्ञातव्यं देवेण स्वरोदयः १८ **टीका** गुरुरेव इति गुरुप्राज्ञोपनीयात् प्रकाशाद्गुह्यतरम् अतिगोपनीयं सारं श्रेष्ठ
स्वरोदयज्ञानं सर्वप्रकाशितं कोहं शं यत्र अतिनीयं मलिके [illegible] उपरिस्थितं सर्वज्ञानाद् अधिकमित्यर्थः १५ स्थूलात्सूक्ष्मतरं सु
बोधं सत्यप्रत्ययं यथार्थ सर्वलोकप्रकाशकं तादीपकमिव नास्तिके मिथ्यावादे निन्दा स्वर्यं विस्मयकारेण प्रकारेण ज्ञानं पुत्रे श्रेष्ठ
रहिते न दीयते न प्रकाशनीयम् इत्यर्थः गुरुतल्पगे गुर्वङ्गनागामिनि ४ प्रकाशस्थानमाह शांते इति एष स्वरोदयः शांते इत्यादि वि
शेषणयुते ज्ञाने प्रकाशयेद् इत्यर्थः १८ **इति श्रीनरपतिजयचर्यायां मात्रादिपंचस्वरचक्रटीका अथ शरीरस्वरूपेण सामर्थिं जयादि**
यन्ति फलमस्योच्यते अथातः संप्रवक्ष्यामि शरीरस्थं स्वरोदयं हंसाचारस्वरूपेण येन ज्ञानं त्रिकालजं १९ **टीका** अथेति अथानंतरम् अ
शरीरस्थं स्वरोदयं प्रवक्ष्यामि येन हंसस्वरूपेण त्रिकालजं जानातीति १९ **श्लोक** ॥ कुंडलिनी महाशक्तिर्नाभिस्था सर्परूपिणी क
धंगा दशनाड्यस्तु दशचाधः स्थिता मताः २० **टीका** कुंडलिनी नाम्नी कुलवत् कुंडलाकारा सर्परूपिणी सर्वपूर्वस्वरूपदेही
दितनवती श्रुतीय ध्याहार्यं ततः कुंडलिनीतो दशनाड्य ऊर्ध्वगता दशाधोगता इति द्वादश २० **श्लोक** द्वे द्वे तिर्यग्गते नाड्यौ चतुर्विंश
न्तु खो हताः कुंडलिन्या महाशक्तेर्मूलमार्गा भवन्ति ता २१ **टीका** द्वे द्वे नाड्यौ तिर्यग्गते स्तः तेन चतुर्विंशति संख्या नाड्यो
भवंति कुंडलिन्याः शक्ति तस्या महाशक्तेर्मूलमार्गाः प्रधानपंपाणोसी २१ **श्लोक** ताभ्यः सू दशमुख्या नाड्यः शरीरस्य विपोष
काः शतानि सप्तजायंते सप्तोत्तर अतिसंख्यया २२ प्रधाना दशनाम सूदशवायुप्रवाहकाः तामान्याः संप्रवक्ष्यामि नाडे वायुस्व
रूपेण च २२ **टीका** ताभ्यश्चतुर्विंशतिसंख्या नाड्यो भवं[illegible] समधिकानि सप्तशतानि जायंते तत्र सर्वनाडीषु दश नाड्यः प्रधा
नाः ताश्च वायुप्रवाहका वायुसंचारहेतवः प्रधानदशनाडीनां नामानि वक्ष्यामि २३ **श्लोक** इडा च पिंगला चैव सुषुम्णा गांधारी
हस्तिजिह्विका पूषा च अलंबुसा च कुहूः शंखिनी कीर्तया २४ प्राणोपानः समानश्च उदानो व्यान एव च नागः कूर्मः कृकल

श्री
न० प०
ज० टी०
५

योदेवदत्तो धनंजयः २५ प्रकटः प्राणसंचारो लक्ष्येद्देहमध्यतः इडा च पिंगला नाडी सुषुम्णा च तृतीयका २६ इडा नाडी स्थिता ३३
चंद्रः पिंगला भानुवाहिनी सुषुम्णा शंभुरूपेण शंभुर्हंसस्वरूपकः २७ हकारे निर्गमे प्रोक्तः सकारे हि प्रवेशने हकारः शंभु
रूपी स्यात्सकारः शक्तिरुच्यते २८ शक्तिरूपस्थितश्चंद्रो वामनाडीप्रवाहकः दक्षनाडीप्रवाहश्च शंभुरूपी दिवाकरः
२९ टीका इडा पिंगलेत्यादि श्वासवक्ष्य प्राणादितः श्लोकद्वयं व्यक्तार्थमेव न व्याख्यातं २५ प्रकट इति देहमध्यगतः श
रीरमध्ये प्रकटः व्यक्तो वायुसंचारः इडापिंगलासुषुम्णाभिस्तिसृभिर्नाडीभिर्लक्ष्यते इडापिंगलासुषुम्णानाड्यु
स्थितेन वायुना फलेन व्यक्ति २६ इडेति चंद्रः इडानाडीस्थितो वामनासापुटस्थः पिंगला दक्षिणनासापुटस्थसूर्यवा
हिनी सुषुम्णा देहमध्यस्था ब्रह्मरंध्रगामिनी शंभुरूपेण स्थिता हंसस्वरूपकः हंसस्वरूपतामाह २७ हकारे निर्गमे प्रोक्त
इत्यव्यक्तार्थमेवेति २८ श्लोक एकैकस्य कलाः पंच क्रमेणैवोदयंति ताः पृथ्वी आपस्तथा तेजो वायुराकाश एव च २
मध्ये पृथ्वी त्वधश्चापऊर्ध्वं वहति चानलः तिर्यग्वायुप्रवाहश्च नभो वहति संक्रमे ३१ टीका एकैकस्य पंचकला इडाः
प्रत्येकं ताः कलाः पंचभूतात्मिकाः क्रमेणैव जायंते ३० मध्ये नासापुटमध्ये अधश्चापऊर्ध्वमनलः वायुस्तिर्यक् नभश्च
काशः संक्रमे ब्रह्मांतरागमने वहति ३१ श्लोक पृथ्व्यादिपंचतत्त्वस्य एकैकं घटिकोदयाः अहोरात्रस्य मध्ये तु तेन
द्वादश संक्रमाः ३२ आदौ चंद्रः सिते पक्षे भास्करस्तु सितेतरे प्रतिपदादिनानि स्युस्त्रीणि त्रीणि क्रमोदये ३३ चंद्रोदये राम
वहत्सूर्यश्चंद्रः सूर्योदये यदा गृहभंगादिनिरुद्वेगः शुभं सर्वं तिलोदये ३४ टीका एकैकतत्त्वस्य पृथिव्यादेर्घटिकोदयाः ५
तत्र षष्टिर्दंडात्मकमहोरात्रं भवति तेन पंचतत्त्वस्य दिनमध्ये द्वादश संक्रमाः संख्या भवति ३२ आद्यास्तिथिषु चंद्रो वा
मनासापुटवायुः प्रतिपदादित्रीणि दिनानि सितासिता आदौ वहति ततो दिनत्रये सूर्यः ततो दिनत्रये चंद्रः सितेपक्षे कृष्ण

पक्षे आदौ भास्करवद्ध इति पुनस्थं ३ एवमेवाग्रेपि ३३ चंद्रोदये इति पुनः एवं चंद्रोदयसमये सूर्यो वहति सूर्योदये चंद्रो व 34
हति वामवायुतदा शुभं हानिरुद्वेगो जायते तिमोदये शुभं भवतीति ३४ श्लोक शशांके चालयेद्रात्रौ दिवा चार्यो दि
वाकरः इत्यभ्यासरतो नित्यं स योगी नात्र संशयः ३५ यात्रादाने विवाहे च वस्त्रालंकारभूषणे शुभे संधौ प्रवेशे च।
चंद्रचारः प्रशस्यते ३६ विग्रहे द्वंद्वयुद्धे च स्नानभोजनमैथुने व्यवहारे भये भंगे भानुनाडी प्रशस्यते ३७ होमं च शांति
कं चैव दिव्यौषधिरसायनं विद्यारंभः स्थिरं कार्यं कर्तव्यं च निशाकरे ३८ दूरयुद्धे जयी चंद्रः समासन्ने दिवाकरः वहन्ना
डीपदे चैव यात्रा भवति सिद्धिदा ३९ टीका प्रवेशो गृहप्रवेशो ग्रामनगरप्रवेशो वा विग्रहे रणे व्यवहारे बालिस्यादिकर्म
णि भये भयविधौ संगे संग्रामपलायने दूरयुद्ध दूरप्रवेश युद्धे वा एतद्धि निर्बोधे केचिद्द्वंद्वकाले व्याप्य युद्धं स्वल्पकालव्या
प्य इति इत्यातिवयोरयं कुर्वते नाडीपदे वहंती या नाडी वामे दक्षिणे वा पदे दीयमाने सिद्धिदा यात्रा भवतीति तत्त्वपि स्वर।
शाकुष्यमाणः कर्तव्यः वामे वा दक्षिणे वा पदप्रत्येकं पृथिव्यादिपंचतत्त्वस्य वहति प्रत्येकं फलमुपदर्शयति पृथ्वीति २ श्लोक
पृथ्वीजले शुभे तत्त्वे तेजो मिश्रफलोदयः हानिमृत्युकरौ पुंसामुभौ च व्योममारुतौ ४० योद्धृपक्षे कृते प्रश्ने पूर्णे च प्रथ
मो जयी रिक्ते संस्थे द्वितीयस्तु जयी भवति नान्यथा ४१ युद्धकाले यदा चंद्रः स्थायी जयति निश्चितं यदा सूर्यप्रवाहस्तु या
यी विजयते तदा ४२ पार्थिवेन कृतं युद्धं संधिर्भवति वारुणे विजयो वह्नितत्त्वेन वायौ भंगो मृतिः खके ४३ पूर्णनाडी
गते पृष्ठे शून्यमंगं तदग्रतः शून्यस्थाने कृतः शत्रुर्म्रियते नात्र संशयः ४४ टीका। पृथ्वीजले शुभे तत्त्वे पृथिव्यां जले
च वहति तेजो मिश्रफलोदयः प्रथमार्धे शुभं द्वितीयार्धे अशुभं व्योममारुतौ हानिमृत्युकरौ प्रत्येकं क्रमाद्भवतः ४० योधद्व
यप्रश्ने कृते सति अग्रे जयी स्यादेवं रूपो यः प्रथमे प्रश्नकर्ता संपूर्णनाडीगतो भवति तदा जयी स्याद् द्वितीयः शून्य

स्वो०
नं० प०
नं० हो०
१८

नाडीगतोयत्र भवति तदा जयी शत्रुवाक्येन यद्यद्योधविषयकः प्रश्नः कृतः तत्र शून्ये नाडीस्थे जयो वाच्य इति यस्ता
न प्रथमं गृह्णाति स जयी शून्यनाडीस्थो यस्य नाम पश्चाद् गृह्णाति स जयी भवति नान्यथेति ज्ञातव्यं ४१ यदा युद्धकाले चंद्रो
वहति तदा स्थायी जयी भवति तथा च स्थानवासिना चंद्रवायुप्रमाणे सति युद्धं कर्तव्यं एवं यायिना सूर्यवायुप्रवाहे स
ति दक्षिणवायौ वहति युद्धं कर्तव्यं ततो यायी जयी स्यादिति ४२ पार्थिवेन तत्त्वेन वहता कृतमयि [illegible] कृतं ४३ पूर्ण
नाडीगतस्यांगं शरीरं [illegible] पूरतः कृता तदग्रतः शून्यमंगं कर्तव्यं शून्यस्थानं कृतं शत्रुर्म्रियते तदा च यस्मिन्समये शत्रोः प्र
हारः क्रियते तदा यः स्वरो न वहति तद्दिगवस्थितं कृतात्दस्मात् शत्रुकृतप्रहारसमये यः स्वरो वहति तद्दिगवस्थितशरी
रं शत्रुकाभिमुखं कुर्यात् तत्र प्रहारो न लगति एवं मुखस्य पोधकविषयिक [illegible] प्रश्ने शून्ये कृते ---- विचारश्च
शून्यदिशि तिष्ठति स प्रहारभागी भवतीत्यादिकं स्वहृदये नैव विभावनीयं ४४ श्लोक पूर्वोत्तरदिशोश्चंद्रे भानोः पश्चि
मयाम्ययोः स्थितश्चेज्जयी युद्धे स्थायी यायी क्रमेण च ४५ वामनाड्युदये चंद्रे कर्तव्यो वामसंमुखः सूर्यवाहे तथा स
र्वः पृष्ठिदक्षिणगो जयी ४६ शयने वा प्रसंगे वा युवत्यालिंगनेपि वा यः सूर्येण पिवेच्चंद्रं स भवेन्मकरध्वजः ४७ जी
वेन गृह्यते जीवो जीवो जीवस्य दीयते जीवस्थाने गतो जीवो बालो जीवांतकारकः ४८ रात्र्यंतयामवेलायां प्रसुप्ते
कामिनीजले सुप्तजीवं पिवेद्यस्तु बालाजीवहरो नरः ४९ टीका वायोः स्वकर्मस्योपयोगित्वं दर्शयति शयन इति
शयनादिकर्मणि यः पुरुषः सूर्येण दक्षिणवायुना चंद्रं वामस्वरं युवत्याः पिवेत् स युवा कामो भवति तद्वशीकरणा
दित्यभिप्रायः पुरुषस्य वामशयनेनैव वशं भवति वायुं नियम्य कामफलोपयोगित्वं चाह ४७ जीवेनेति जीवेन वायुना ना
सापुटस्थेन जीवः स्वमित [illegible] धातुः गृह्यते नियम्यते [illegible] तेन नियमितो जीवो धातुः जीवस्य स्याप्रिधातः जीवो दीयते एतावे

राम
१८

ताजीवस्थानगतधानाराख्यप्राप्तिः स एवं विन्यस्यमानो योगी विद्रानुकरो भवति चिरकालरमणैकमात्र यद्वा तथा च
वहन्स्वरो बाह्यस्वररहितः शून्यस्वरं पुनः स्वस्थानमानीय बालाभिभावुको भवतीत्याशयः ४८ रात्रेः पश्चिमयामस्य म
ध्यगो युवत्याद्वदरं धृत्वा निर्गतं वायु पिवेत् स नरो बाला जीवदृशोत्यंताभिभावुको भवतीति ४९ श्लोक चंद्रे ढयोग
पुंनार्योः प्रसंगे तस्यतत्क्षणे तत्क्षणं दापयेच्छंद्रं मोहमायाति कामिनी ५० चंद्रचारी विषं हंति सूर्यो बालात्वशं नयेत्
सुषुम्नायां भवेन्मोक्ष एको देवस्त्रिधामतः ५१ भुक्तमात्रे च मंदाग्नौ स्त्रीणां वश्ये च कर्मणि शयनं सूर्यवाहेन क
र्तव्यं सर्वदा बुधैः ५२ शांते शोके विषार्ते च ज्वरिते मूर्छिते पि वा सज्जनस्यापि वा धार्यं चंद्रवारं प्रवाहयेत् ५३ टी
का चंद्रे योग इति पुरुषस्त्रियोः चंद्रे योगे पुरुषस्य दक्षिणस्वरो स्त्रियो वामस्वरे चरमकाले वहति सति तत्क्षणे सू
र्ये सति तत्क्षणे चंद्रो दीयते तदा कामिनी मोहमायाति ५० चंद्रचारीति चंद्रचारी वामनाडी संचारशीलो विषं
हंति यदा सर्पादिदंशो सति तदा वामवायुर्यथा वहति तथा विधेयं सूर्ये दक्षिणवायौ वहति सति बालां वशं नये
त् सुषुम्नायां द्वयमतनाड्यां वायुसंचारान्मोक्षो भवति एक एव देवो वायुस्त्रिधा त्रिप्रकारेण मतः यदा यद्वहं
ति तदा तत्कार्यं कुर्वीतेति ५१ भुक्तमात्र इति भुक्तमात्र भोजनसमये इत्यादि कार्ये [illegible] सूर्यवाहेन दक्षिणवायुप्र
वाहकेन दक्षिणवायुना शयनमपि कर्तव्यं यदा तु [illegible] दक्षिणं वहति तदा वामपार्श्वे शयना [illegible]
[illegible] दक्षिणो न वहति ५२ शांते इति शांते इत्यादिष्ववहारे चंद्रवारं वामस्वरं प्रवाहयेत् यदा प्रकृत्या वामस्वरो न वह
ति तदा दक्षिणपार्श्वे शयनादेव वामस्वरो भवतीति ५३ श्लोक ऊर्ध्वं वामाग्रतो दूतो ज्ञेयो वामपथस्थितः पृष्ठे दक्षे त
था धस्तात्सूर्यवाहगतो मतः ५४ टीका प्रश्नार्थं विचारयन्नाह ऊर्ध्वे उपरि [illegible] वामदिशि अग्रतो वामपदि [illegible]

36

37

तदा वामस्थितो ज्ञातव्यः तेन वामे वहति तदुभयस्थितः [illegible] लिंगेन तथा धन्वा च सूर्ये वा हगतो।
श्री० मतः दक्षिणे वहति सति तदधःस्थितः पूर्णस्वरो ज्ञातव्यः तत्र पृष्टे कृते फलं सिद्ध्यतीत्यनुपदमेव वक्ष्यते ५४ श्लोक। पू
न०प० र्णनाडीस्थितो दूतः पृच्छतीष्टशुभाशुभं तस्य सर्वसिद्धिमायाति शून्ये शून्यं [illegible] न संशयः ५५ स्पष्टं श्वासे शून्यगतः पृच्छे
ज०टी० त्पश्चात्पूर्णविशेषयदि तदा सर्वार्थसिद्धिः स्यादिति ज्ञानीतिनिश्चितं ५६ स्पष्टं पृथिव्यादित्रितत्त्वेन दिनमासादिकैः फ
५८ लं शोभनं च तथा इष्टं व्योममारुतवह्निभिः ५७ श्वासप्रवेशकाले च दूतो जल्पति वांछितं तस्यार्थः सिद्धिमायाति निर्गमे
टी० नास्ति सुंदरि ५८ पृथिव्यादित्रितत्त्वेन पृथिव्यतेजोभिर्बदरि प्रत्येकं फलं वक्ष्यं व्योममारुतवह्निभिर्दुष्टं फलं भवति
तोये मिश्रफलमिति पुनश्च तेजसो गृहणं ५७ यदि दूतः श्वासप्रवेशकाले जल्पति तदा वांछितफललाभो भवतीति ५८
श्लोक सूर्ये च विषमे वर्णे समवर्णे निशाकरे वाहस्था भाषते दूतस्तदा लाभोऽन्यथा न हि ५९ टीका सूर्ये दक्षिणवा
यौ वहति सति तत्रस्थो दूतो यदि विषमवर्णान्विषमाक्षरं भाषते निशाकरे चंद्रवायौ वहति सति तत्रस्थः समवर्णसम
क्षरं भाषते तदा लाभो भवति अन्यथा वैपरीत्येन लाभो न भवतीत्यर्थः ५९ श्लोक गर्भप्रश्ने यदा दूतः पूर्णे पुत्रःपु
जायते शून्ये कन्या युगे युग्मं गर्भपातश्च संक्रमे ६० टीका यस्मिन्काले दूतो गर्भप्रश्नं करोति तदा पूर्णस्वरे सति पु०
युगस्वरद्वये सति युग्मं पुत्रः कन्या च भवति स्वरशेषे संक्रमे च परस्परसंयोगात्त्रिसमये ६० श्लोक मारणं मोहनं स्तंभं। राम
विद्वेषोच्चाटने वशं प्रेरणाकर्षणे क्षोभं भानुनाड्युदये कुरु ६१ टी० भानुदक्षिणवायौ श्लोक शांतिकं पौष्टिकं प्रीतिर्दि ५८
व्यौषधिरसायणं योगाभ्यासादिकर्माणि कर्तव्यानि निशाकरे ६२ चंद्रसूर्यस्वराभ्यासं ये कुर्वन्ति सदा नराः अतीता
नागतं ज्ञानं तेषां हस्तगतं सदा ६३ भेदा यं स्वरपंचके [illegible] गदितास्ते स्फुरिकाः कालमा [illegible] बालकुमारयौव

नजरानेधन्यवस्यात्तथा तज्ज्ञानं तिगुरूपदेशविधिना भेदाप्रभेदस्थये तेजानंतिफलं स्पष्टमायुर्भयं कालत्रयेनि
श्चितं ६४ टीका स्पष्टमिति शशिकरे वामस्वरे वहति सति ६२ ६३ पंचस्वरकथनरूपस्तु पसंहृतिभेदा इति टीकायांस्व
रस्वराध्यायः श्लोक ॐ अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकं विख्यातं सर्वतोभद्रं सद्यःप्रत्ययकारकं १ अ
थ मंगलेति अतः पंचस्वरकथनानंतरं सच सर्वतोभद्रश्चक्रे मयः फलदातृत्वाद्रूपे हं अत्रिलिंशुभायस्तु भत चक्रांतरेपि।
शुभं यदत्र निषिद्धं तच्चक्रांतरेपि निषिद्धं यदत्र विपरीतं शुभं निषिद्धं चामिश्रफलमिति तात्पर्यं अत्रानोधकारापनय।
नतेन दीपकवत्प्रकाशकं सकलस्वरभाग्यभयप्रकाशकत्वादिदं सद्यःप्रत्ययकारकं प्रत्ययो यथार्थज्ञानं चक्रनिर्माणमनु
पदर्शयति ऊर्ध्वगा दशविन्यस्य तिर्यग्रेखास्तथा दश एकाशीतिपदं चक्रं नात्र संशयः श्लोक॥ स्पष्टं अकारादि
स्वराः कोष्ठे ह्येकाशे विदिशि क्रमात् सृष्टिमार्गेण दातव्याः षोडशैवं चतुर्भवेत् २ टीका तच्चक्रे ईशानादौ विदि
शाकोष्ठकेषु सृष्टिमार्गप्रदक्षिणक्रमेण ईशान्याग्नेय्यां नैर्ऋत्यां वायव्यां अकारादयः षोडशस्वराः चतुर्भेदे चतुरा
वृत्त्या स्थापनीया इत्यर्थः ३ श्लोक कृत्तिकादीनि धिष्ण्यानि पूर्वाद्यादि [illegible] लिखेत्ततः सप्तसप्तक्रमेणैव अ
ष्टाविंशति संख्यया ४ टीका तथा पूर्वाशादि प्रथमपंक्तौ सप्त सप्त क्रमात् कृत्तिकादीनि नक्षत्राणि अष्टाविंशति सं।
ख्यातानि लिखेत् तत्रोत्तराषाढायाश्चतुर्थपदः श्रवणाद्यद्वयं चाभिजिन्नाम तेनाभिजिता सहाष्टाविंशति संख्या
पूरणे तथाहि कृत्तिकादि सप्तकं पूर्वदि[illegible]क्पंक्तौ मघादिसप्तकं दक्षिणपंक्तौ अनुराधादि सप्तकं पश्चिमपंक्तौ
धनिष्ठादिसप्तकमुत्तरपंक्तौ लेख्यं ४ श्लोक। अवकहडादिदिशि प्राच्यां मटपरताश्च दक्षिणे नयभजखा स्तथा
तणपांगसदचलास्तथोत्तरे ५ टीका प्राच्यां द्वितीयपंक्तौ अवकहडा दक्षिणे द्वितीयपंक्तौ मटपरताः पश्चिमा

श्लो० न०प० न०टी० २०

यो द्वितीयपंक्तौ नयभमत्वाः उत्तरस्यां द्वितीयपंक्तौ गमदचलावर्णा लेख्याः ५ [illegible] श्लोक त्रयस्त्रयो ह्यपाद्याश्च स्वीरि
पुबुधैः क्रमात् राशयो द्वादशैवं न मेषान्ताः स्वष्टिमार्गगाः ६ टीका स्वष्टिमार्गेण प्रागदक्षिणक्रमेण अश्व्याद्यास्त्रय
तीयपंक्तौ मेषान्ता लेख्याः शेषेष्विति ६ शेषेषु कोष्टकेष्वेवं नंदादितिथिपंचकं वारार्णां सप्तकं लेख्यं भौमादिप्रक्र
मेण च ७ टीका शेषेषु पंचकोष्टेषु पूर्वादिक्रमेण मध्यपर्यंतं नंदादि प्रतिपत्षष्ठ्येकादशी मुपक्रम्य त्रिरावृत्त्या
तिथिपंचकं लेख्यं पच्यात्प्रतिपत्स्थाने भौमरवी द्वितीयस्थाने चंद्रबुधौ तृतीयस्थाने गुरुः चतुर्थस्थाने शुक्रः पंचम
स्थाने शनिः एवं मपि पंचस्वराधः एवं तिथिवारयोः स्थितिर्लेख्या ८ ग्रहाधीनं सकलं शुभाशुभं ततस्तेषां
क्रूरसौम्यविभागमाह श्लोक शन्यर्कराहुकेतवः क्रूराः क्षीणशशी शुभग्रहाः क्रूरयुक्तो बुधः क्रूरः क्षीणचंद्र
स्तथैव च १० यस्मिन्नृक्षे स्थितः खेटस्ततो वेधत्रयं भवेत् ग्रहदृष्टिप्रभावेण वामदक्षिणसंमुखे ॥ टीका क्षीण
इति कृष्णैकादशीतः शुक्लपंचमीतावत् यस्मिन्नक्षत्रे ग्रहः स्थितः ततो त्रिधा वेधत्रयं वामदक्षिणसंमुखे ग्रह
दृष्टिवशेन भवेत् खेटः ११ श्लोक ग्रहः क्रूरसंयुक्तं विद्याद्दिलिंगिने प्रिये क्रूरस्य संमुखे सर्वं भंजत्रये वेदो
विनिर्दिशेत् १२ भुक्तं भोग्यं तथाक्रांतं विद्धं क्रूरेण यच्च भं शुभाशुभेषु कार्येषु वर्जनीयं प्रयत्नतः १३ टीका एकत्र न
क्षत्रे शुभाशुभेषु कार्येषु सत्सु तस्मिन्नक्षत्रे न कर्म कर्तव्यं किं तत् क्रूरग्रहेण भुक्तं भोग्यमाक्रांतं भोज्यमानं यच्च वि
विद्धं कथितप्रकारेण ग्रहदृष्टिमाह वक्रगे दक्षिणे दृष्टिर्वामा दृष्टिश्च शीघ्रगे संमुखी मध्यचारे तु ज्ञेया भौमादि
पंचके १४ टीका भौमादिपंचके वक्रगे दक्षिणा दृष्टिः तत्र वेधफलं वक्तव्यं शीघ्रगतौ ग्रहे वामा दृष्टिः तत्रापि
वेधफलं मध्यचारे प्राकृतगतौ संमुखी दृष्टिर्ज्ञेया तत्र तत्र शुभमशुभं वा शुभमशुभं ग्रहदृष्टिवशेन फलं नृणां वा

श्लो० ११

राम २०

चं ७ श्लोक सूर्ययुक्ता उदयंते शीघ्रास्त्वर्के द्वितीयगे। समास्तृतीयगे ज्ञेया मंदा भानोश्चतुर्थगे ४ टीका सूर्येण कल्पितां
शकलांतर्गता एकराशिस्थिता ग्रहा अस्तमिता भवंति ये च ग्रहाः सूर्ययुक्ता भवंति अग्रिमराशिगमनेनाबहिर्गता
स्तउदीयंते उदिता भवंति अर्के द्वितीयगे द्वितीयराशिगामिनि सूर्ये यशिगताः शीघ्राः शीघ्रगतयो भवंति तृतीयेस्तु।
तीयगे सूर्ये समाः समगतयः प्रकृतिगतयस्त्वर्थः चतुर्थगे भानौ मंदा मंदगतयः वक्रपूर्वसमयमतिमंदाः पंचमषष्ठे
भानौ स्थिते सति वक्रगतेर्ग्रहाणां स्यात् तथा षष्ठसप्तमग्रहा वधिके [illegible] वक्रगतयः एवं नवमे दशमे भानौ
स्थिते सति वक्रगतिर्जायते ग्रहा द्वादशेकादशे सूर्य भवने पुनर्ग्रहाणां शीघ्रा शीघ्रगतितं भवति एषां राहुकेतु।
सूर्याणां द्वौ ग्रहौ वक्रौ चंद्रसूर्यौ शीघ्रगौ गतेरेकस्वभावत्वा द्वाम दक्षिणसंभव भेदाद्दृष्टित्रयं सदा भवेत् ७ श्लोक
वक्राः स्युः पंचमे षष्ठे अतिवक्रा नगाष्टगे नवमे दशमे भानौ प्राप्यते कुटिला गतिः १८ पूर्वटीका द्वादशैकादशे भा
नौ भवेयुः शीघ्रगाः पुनः राहुकेतु यदा वक्रौ शीघ्रगौ चंद्रभास्करौ १९ गतेरेकस्वभावत्वादेषां दृष्टित्रयं सदा शु
भाशुभं फलं वाच्यं वामदक्षिणसंभवं ७ पूर्वटीका क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महाशुभाः स्युः सहज
स्वभावस्थाः सौम्याः क्रूराश्च शीघ्रगाः १८ घ३ कृष्णएनाखेरेधफठानऊयास्तषा एतत्त्रिकं स्थितां विद्धं विद्धेः
कपनदेः आमात् १९ [illegible] घ३ धारोद्वगेबधेवेणमहत्स्रोशहे धफगः एवं बाहायांयरूना भाइउच्चे
२० टीका क्रूराः इति शन्यादयो वक्राः पश्चाद्गतयो महाक्रूराः शुभा ये वक्रा महाशुभाः तथा तयोर्वक्रयोर्दृष्ट्या शु
ठेक्रमेणनिविद्धं न पि फलं शुभं भवति स्यु इति सहजगत्या स्वभावे स्वराशिस्थिता वक्रा चाउभययाः पि सौम्य
ग्रहाः शुभा भवंति यद्वा सहजगमनेन भवोदितत्वात् बलस्थाः सौम्याः शीघ्रा महाशुभा इति पाठे सहजस्वभावस्थाः

संज्ञो यदि शीघ्रगा [illegible] सौम्या भवंति तदा महत्शुभं भवंति यदि शीघ्रगता क्रूरा यो सहजतं विशेष शालिं न भवंति तद्व 41
श्लो० शुभा एवेति एवं क्रूरा अपि शीघ्रगाः सहजस्वभावस्थाः संतः सौम्याः फलदा इत्यर्थः १८ शुभ [illegible] कपमदेश्चतुरक्षरैः
अ० २० प्रत्येकं विद्धैः एतच्चिक्यिकमस्तर्णो विद्धं भवति तथा वकारे [illegible] वर्णा विद्धाः पकारे विद्धे खणगौ विद्धाः म वर्णा
ज० टी० कारे विद्धे धफटा वर्णा विद्धाः दकारे विद्धाः घमजा वर्णा विद्धा इति शुभ [illegible] तिसीयवेधेन स्वरवेधेन विद्धा
२१ नित्यप्रसंगेनोपदर्शयति आद्ययोरिति अर्थो व्यक्त एवेति २० श्लोक वर्गो शसौ वषौ चैव जयो नणौ परस्परं एकेन तु तयं
वेधश्च भात्पमग्रहेव्यधे २१ टीका द्वैद्वावन्यो योसमौ ज्ञातव्यौ तत्रस्थयोरेकेन द्वितीयं विद्धं स्येय २१ श्लोक अवर्णादि
स्वरद्वंद्वे एकवेधे द्वयोर्वेधः युग्मवर्णात्मके वेधे तनुस्वारविसर्गयोः २२ कोणस्थ्यपि स्थयोर्मध्ये अंत्यादिपादगे ग्रहे
अस्वरादि चतुष्केषु वेधः पूर्णा नाये तथा २२ टीका कोणेति कोणस्थायि स्थयोर्म [illegible] योर्भरणी कृत्तिकयो [illegible] अश्ले
षामघयोः विशाखानुराधयोः श्रवणधनिष्ठयोरंत्यादिपादगे ग्रहे सति प्रत्येकमकरादि चतुष्केषु तथा पूर्णा तिथिः पंच
मी दशमी पूर्णिमा वेधः तथा भरण्यांत्यपादे कृत्तिकाया आद्यपादे यदि वर्तते तदा अकारादयः स्वरास्तारा स्वराः
के शस्याः पूर्णा तिथिश्च मध्यवर्णा विद्धा भवंति एवमन्येष्वपि कोणेषु वेधादि चिंतनीयं २३ श्लोक एकादि क्रूर वेधे
न फलं तु संप्रजायते उद्वेगो यभयं हानी रोगो मृत्युः क्रमेण च २४ टीका पुंसामेकादिउपग्रहक्रूरपंचके वेध राशि
फलं जायते तथा एकवेधेन उद्वेगः द्वितीयेन भयं त्रिवेधेन हानिः चतुर्वेधेन रोगः पंचभिर्वेधैर्न जीवति २४ श्लोक २१
भमक्रूरहते स्वरे हानिः स्वरे व्याधिर्भवंति यो राशिवेधे महाविघ्नं पंचविघ्नो न जीवति २५ टीका भक्षेन क्षत्रे पापक्रम
ग्रहेण विद्धे भ्रमो जायते इत्यादि यदेकदा पंचापि पापग्रहेण विद्धा भवंति तदा न जीवतीति सामान्येनैतच्चिंतनीयं युद्धा।

दृष्टे काटि चतुः पापग्रहेणैव रिष्टफलमुपदर्शयति २५ श्लोक एकवेधे भयं पुंसो द्वयोर्वेधे धनक्षयं त्रिवेधेन भ
वेद्रोगो मरणं स्याच्चतुर्ग्रहैः २६ भयं भंगश्च घातश्च मृत्युर्भंगश्चतुष्टतिः क्रूरैरेकादिभिर्वातै पुंसो वेधात्फलं वधेत् २७ टी
का एकवेधरस्मिन्नविशेषतः स्थानवेधे वर्ष वेध एवं चिंतनीयं पापग्रहवैपरीत्येन शुभग्रहस्य फलमाह २७ [illegible]
यथा दुष्टफलाः क्रूरास्तथा सौम्याः शुभप्रदाः क्रूरयुक्तास्तथा सौम्यो मेधः क्रूरफलप्रदः २८ टीका एवं क्रूरयुक्तः सौ
म्यो बुधः क्रूर एवेति क्रूरफलदः २८ श्लोकाः अर्कवेधे मनस्तापो द्रव्यहानिस्तु भार्गवे रोगपीडाकराः सौरेमाहुकेतौ
च विग्रहे २९ टीका स्पष्टं वेधे सति मनस्तापश्चैत्रस्याहं २९ श्लोक चंद्रे मिश्रफलं पुंसां स्त्रीत्वे च भार्गवे बुधवे
धे भवेत्स्वर्णं जीवः सर्वफलप्रदः ३० टीका मिश्रेति यदा चन्द्रो क्षीणस्तदा पापता तदा पापमेव फलं प्रदाय क्षीणस्तदायम
तिः स्त्रत्वं शुभसहिते बुधे पापरहिते बुद्धिः यदि मिश्रग्रहाणां वेधः स्यात्तदा हर्षमेव फलं भवेत् सबलग्रहस्य पू
र्णफलं वाच्यं तदबलग्रहे बलस्यात्ति ३० श्लोक सबले तस्य बलं पूर्णं पादोनं मित्रभे ग्रहे अर्धं समग्रहे ज्ञेयं पादं शत्रुग्रहे
स्थिते ३१ टीका रवेः सिंहः स्वक्षेत्रमित्यादि रवेः कन्या केशो मीनः रवेश्चंद्रमंगलगुरवो मित्राणि चंद्रस्यारविबुधौ
कुजस्यारविचंद्रगुरवः मंगलस्य शुक्रशनी बुधस्य कुजगुरुशनयः गुरोः शनिः शुक्रस्य कुजगुरुशनेः गुरुः एभ्यो मित्र स
मेभ्यो न्ये शत्रवः पादचतुर्थांशं यदि तत्कालेत दाधिमित्राणि एतद् ग्रहमिहिराद्बोध्यं ३१ श्लोक इदं सौम्यस्य क्रूराणां
बलं स्थानवशात्मकं एतदेव बलं बोध्यं सौम्यैः क्रूरैर्विपर्ययात् ३२ टीका सौम्यानां क्रूराणां चेदं बलं स्थानवशात्मकं ।
एतदेव बलं सौम्यैः क्रूरैश्च विपर्याद्बोद्धव्यं यथा क्रूरस्य स्वगृहे चाधिकं बलं मित्रगृहे अर्धं समगृहे न शत्रुगृहे पूर्णं स्वस्थान
यो स्थानबलं ३२ श्लोक स्थानवेधसमायोगे यस्तं संज्ञायते बलं तत्तद्वेधवशान्नाफलं तस्य विचक्षणैः ३३ टी

43

श्लो॰
न॰ पं॰
ज॰ टी॰
२२

ग्रहाणां स्थानवेदसमयोगे सुग्रहादेः स्थानात् वेधसमायोगे वेधसंभवे क्रूरसौम्यग्रहाणां वादिकं बलं जायते उत्पद्यते वेध्य
वस्तूनां विचक्षणैः तत्संख्या शुभाशुभं फलं ज्ञेयं अन्यदपि स्थानबलमुपदर्शयति ३३ श्लोक ग्रहाः सौम्याः स्वयाः क्रूरा वक्रे
मार्गे शीघ्रनीचगाः स्थानस्था वध्यवस्तूनां बलं स्थानफलं वदेत् ३४ टीका सौम्याः क्रूरा वा ग्रहाः क्रमेण क्रमार्गाः शीघ्रनीचगाः
वक्राः पश्चाद्गामिनो विपरीतगतयः मार्गगाः प्रकृतिगतयः शीघ्रनीचगाः स्थानस्था इति ... एवं बलं स्थानफलं वेधेव
देत् ... मेषवृषादि ... स्थाने नीच इति ... वक्रग्रहे फलं द्विगुणं त्रिगुणं स्वोच्चसंस्थिते सा श्लो॰
भावजं फलं शीघ्रनीचस्थोऽर्धफलप्रदः ३५ टीका वक्रे ग्रहे सौम्ये क्रूरे द्विगुणं द्विगुणितं फलं एवमुच्चे त्रिगुणादिफलं
द्विविधा ... विध्यति तादृशं फलं वेधे ददाति ३६ श्लोक तिथिराश्यंशनक्षत्रं विद्धं क्रूर
ग्रहेण यत् सर्वं शुभकार्येषु वर्जनीयं प्रयत्नतः ३६ न नंदति विवाहे च यात्रायां नाथ निवर्तते नरो गान्मुच्यते रोगी वेधवे
लाकृतोद्यमः ३७ रोगकाले भवेद्वेधः क्रूरश्चैव चरसंभवः वक्रगता भवेन्मृत्युः शीघ्रे व्याधिरुजान्वितः ३८ टी॰ तिथितिथि
शकः नवांशकं क्रमेण नक्षत्रं क्रूरग्रहेण विद्धं भवति तत्प्रयत्नेन शुभेषु कार्येषु वर्जनीयमिति तस्माच्छुभं कर्म न क
र्तव्यमित्यर्थः तिथ्यादौ विद्धे सति कर्मस्तु दोषमुपदर्शयति न नंदतीति वेधवेला कृतोद्यमः पुरुषः वेध्यतिथ्यादावाश्रि
त्य समये कृतोत्साहो नरो विवाहेन नंदति न हृष्यति यात्रायां कृतायां न निवर्तते परावृत्य नागच्छति वेधवेलायामुत्पन्न
रोगात् रोगी न मुच्यते नीरोगो भवतीत्यर्थः ३८ रोगकाले रोगसमुत्पत्तिसमये क्रूरश्चैव चरसंभवः पापग्रहकृतो वेधो भव राम
तीति स चेद्वेधो वक्रगस्य तदा रोगिणो मृत्युर्भवति शीघ्रपापवेधकर्तरि व्याधिरुजान्वितः चिरकालरोगेनान्वितः पुरुषो भवती २२
त्यर्थः श्लोक वेधस्थाने भवेद्रोगो दुर्गे सुहृदि प्रजायते कर्माप्येवं ... तत्रवे ३९ ...

तारका दिग्गोरविः सा दिग्लम्बिता ज्ञेया शेषास्तिस्रस्त्वयोदिताः ४० ईशानस्थाः स्वराः प्राच्यां ज्ञेया आग्नेयगा यमे नैरृतस्थाः लृ
वारुण्यां वायव्यां सौम्यगामताः ४१ टीका ईशानस्थाः स्वराः प्राच्यां ज्ञेया आग्नेयगा यमे वेधस्थाने भंगो भवेत् यत्रस्थाने नक्षत्रादि
क्रमेण सर्वतोभद्रचक्रे नक्षत्रवेधो भवति तद्दिशि ग्रामे दुर्गे कोटे सैन्ये भयो भवति तस्यपुरस्य दुर्गादेर्नामः प्रथमवर्णोपि
दुष्टस्यापि भंगमनु हनीयः दुर्गे बहिः घातो भवति प्रकर्षेण जायते कविप्रवेशनं कविम्लुज्झरति प्रसिद्धः तदर्थं प्रवेशाने विदु
ष्टोराहुः पापग्रह विद्धनक्षत्रे हस्यावगम्य तत्रैव योधघातः तद्दिगवस्थितो योधः अत्र यदंगनामवर्णो विद्धः पुरस्य दुर्ग
दे र्नामाय यद्वेधो न भवतीति न हनीयं ४० व्यवस्थान्तरमाह यत्रेति यत्र नक्षत्रादौ पूर्व दक्षिण पश्चिमोत्तरदिशि कृप
तारकादिनः सूर्यो भवति सा दिग्लम्बिता ज्ञेया यथास्मिन्सर्वतोभद्रचक्रे पूर्वपत्रेति यत्र नक्षत्रादि गादेवृषादित्रयमस्तीति
तेन तत्रस्थरविणा ज्येष्ठाषाढश्रावणमासे पूर्वादिग्लम्बिता अन्यास्तिस्रो दिशिउदिताः ईशानस्था इति ४१ स्वरा ईशा
नदिगवस्थिताः पूर्वास्थिता ज्ञेयाः आग्नेयगा दक्षिणे नैरृतस्थाः पश्चिमदिशि वायव्यदिग्गताउत्तरायां दिशि नक्षत्रादि फलं
श्लोकद्वयेनोपदर्शयति श्लोकः नक्षत्राणि स्वरा वर्णा राशयस्तिथयो दिशः ते सर्वे लंगता ज्ञेया यत्र भानुस्थिमासिकः ४
२ नक्षत्रे लेरुजा वर्णे हानिः शोककराः स्वरः राशो विघ्नं तिथौ भीतिः पंचास्ये मरणं ध्रुवं ४४ पात्राघुद्वे विवादं च हारं प्रा
णादहृस्थयोः नकर्तव्यं सुमंत्रानदस्ताचाभिमुखं नरैः ४५ कवीकोदेनयाघुद्धे चतुरंगेमहाहवे वर्ण्याश्चैलगतायोधाय
दो क्षेदितयं रणे ४६ अस्ता राया स्थितयस्य नामाद्यमक्षरं यदा तदा तेसर्वकार्येषु ज्ञेयोदेवहतो नरः ४७ नक्षत्रे भुदिते
पुष्टिर्वर्णे लाभः स्वरे सुखं राशौ जय [illegible] तिथौ तेजः पद्याप्तिः पंचकोद्भवे ४८ प्रस्नकाले भवेद्विद्धं यद्यलग्नं क्रूर खेच
रैः तद्दृष्टो भनेसौम्यैर्मिश्रेर्मिश्र फलं मतं ४९ क्रूरमिश्रं तयद्यलग्नं फलं लग्नस्य भावतः ज्ञातव्यमीदृते वेंद्रे भाषितं य

श्री०
नं०५०
जं०टी
२२

45

श्चरादिकं [illegible] ५० क्रूरै रुभयतो विद्धा यस्या ऋरातिथिस्तराः राशिश्चिंह्रस्य वर्ण चापि तस्य मृत्युर्न संशयः ५१ टीका नक्ष
२ ल० त्रादि फं श्लोकद्वयेनोपदर्शयति नक्षतेति नक्षत्रादवर्ग दिगवस्थिते प्रत्येकं रुआदि फलं पंचापि यत्रास्ते त्तदिशि वर्त्तते नदघ्न
वं निश्चितं मरणमेव भवति यात्रेति शुभं यात्रादिकं कर्म यदशुभं मरणादिकं कर्म तदा शाभिमुखे श्लाघाभिमुखेन कर्त्तव्यं
४५ श्लाघायामिति यस्य पुंसो नामाद्यक्षरं श्लाघायां स्थितं स नरो दैवहतो ज्ञेयः प्रयोजनमाह कथाविति ४६ यदि रणे वि
जय [illegible] क्रेत तदा स्वंगता श्लाघा दिगवस्थिता योधानां नामाद्यक्षराणि कवी पृष्ठे कोदाहोवर्ज्यति ४७ उदितनक्षत्रादि फ
लमाह नक्षत्रेति पंचकोदये एकदा नक्षत्रवर्णस्वरतिथीनां उदये उदिता दिगवस्थिते यदा ग्रहैर्भिन्नस्यानाम्निरित्यर्थः ४८
प्रश्न इति प्रश्नकाले यत्र लग्ने क्रूरग्रहैर्विद्धं भवेत्तन्निषिद्धं सौम्यैः शोभनमिति एवं फलं वक्तव्यं मिश्रे सौम्यक्रूरैर्यदि विद्धं
तदा मिश्रफलं मनं तं ज्ञेयमित्यर्थः ग्रहभिन्नमिति यत्र लग्न ग्रहेण भिन्नं उदितराशि ग्रहभिन्नं लग्नस्य भावितो राशिस्वरूपा
द्यचरस्थिरद्विस्वभाव बोधकं भवति फलं कीदृशं कुंडलीक्रमेण केंद्रेषु लग्नेषु शुभग्रहदृष्टं यत्फलं भावितं कथितं अतः शुभग्रह
वेधेन लग्ने ग्राके इष्टशुभग्रहदृष्टे वरादिराशौ शुभे चरादिकार्याणि सिद्ध्यंतीति वक्तव्यं विशेषेण रणादौ सर्वं भवतीति
मिश्रतं शुभाशुभयोगेन तादृशं फलं वक्तव्यं ग्रहभिन्नमिति कचित्पाठः ग्रहभिन्नं ग्रहैरादितं तत्र आपि सर्वरीत्यैव फलनि
र्देशः मेषककर्कट तु [illegible] ला धर मृगाश्चतारश्चरराशयः लग्नं च तत्र्यक्षनस्यानानि केंद्राणि कथितानि ५० क्रूरेति तत
स्य मृत्युर्भवति यस्य क्रूरैः पापग्रहैरुभयतः क्रमोत्क्रमाभ्यां नक्षत्रतिथिस्वरनक्षत्रराशयः पंचापि विद्धा भवंति अत्र
न संशयः कार्यमित्यर्थः ५१ श्लोक मंडलं नगरं ग्रामो दुर्गं पंचालयं पुरं क्रूरोभयस्थितैर्वेधैर्विनश्यंति न संशयः ५२ कृत्रि
कादिनि काद्ये मेक्रूरवेधे व क्रूर मतः नाभिस्य देशायेतन्नतेन श्यंति यथाक्रमात् ५३ टीका मंडलादीति एतानि क्रूरैरुभ

यम
२२

यतः स्थितैर्वेधे कृते सति नश्यंतीति न संशयः यं लमर्छेद ग्राम चिन्हितो ग्रामसमूहः नगरं राजचिन्हितं स्थानं ग्रामः
पुरमिट्ठ एवं दुर्गं कोटादि देवालयं देवतास्थितिस्थानं पुरं राजनाम चिन्हितं राजधानी सदृशो ग्रामविशेषः नामाद्यक्षरा
दिवधेन तेषां वेधं भवति ५२ कूर्मतः कूर्मचक्रात् कृत्तिकादीनि नक्षत्राणि नाभिगतानि क्रमेण कूर्मशरीरेषु नवस्वपि चक्रे
षु न्यस्तानि तत्राद्यंशेन सप्तके क्रूरविद्धे सति तद्वेधेनाभिस्थिता देशास्तेन नश्यंति अयमभिप्रायः यत्र नक्षत्रे क्रूरग्रहवि
द्धं तत्रापि सर्वतोभद्रचक्रेपि पापग्रहेण वेद्धिं तं तत्तच्चिन्हितं कूर्मचक्रोक्तं देशादि नश्यतीति यद्येकाक्षरं विद्धं तदा
माधरणीपीडा भवति कूर्मतोभ्यादि नक्षत्रेषु शन्यकाक्रांतेषु पापग्रहविद्धेषु वाथ्यावतासां केतमिथिलाचंपेत्यादिपु
रोवंकल्पित देशेषु यन्नामाक्षरं विद्धं भवति तदवश्यं विनश्यतीति शुभवेधे च शुभमिति ५३ श्लोक कृत्तिकायां तथा
पुष्ये रेवत्यां च पुनर्वसौ विद्धे सति क्रमाद्वेधो वर्णेषु ब्राह्मणादिषु ५४ तैलं भांडं रसो धान्यं गजाश्वादि चतुष्पदाः
सर्वं महार्घतां याति यत्र क्रूरो व्यवस्थितः ५५ टीका कृत्तिकादिनक्षत्रचतुष्टयवेधे सति ब्राह्मणक्षत्रियवैश्यशूद्रेषु
क्रमाद्वेधो ज्ञातव्यः कृत्तिकायां विद्धायां ब्राह्मणे वेधो भवति स चेद्वेधः शुभस्तदा ब्राह्मणेषु शुभं वक्तव्यं पुष्ये
विद्धे क्षत्रियेषु वेधो ज्ञातव्यः एवं रेवत्यां विद्धायां वैश्येषु पुनर्वसौ विद्धे शूद्रेषु वेधो ज्ञेयः शुभग्रहेण शुभमशुभे
नाशुभं फलं बोद्धव्यं तथा च वराहाचार्येण पराण्यपि लिख्यंते ५५ श्लोक सर्वत्रयं तानलमग्रजानां राज्ञां च पुष्येण
महीतराणि सपौष्णमैत्रं पितृदैवतं च प्रजापतेर्भं च कृषीवलानां आदित्यहस्ताभिमपदाश्विनानि जनस्याम्यनुपाना
तानि सार्पं विशाखा श्रवणो भरण्यश्चं चांडालजातेरपि निर्दिशंति ५६ टीका कृत्तिकादिचतुष्टयवेधे शुभाशुभग्रहव
शात्कृत्तिकादौ यथा भवत्तन्यानां त्यजानि विपिचित्विमिति ५७ तैलं तिलादि भांडं भाजनं रसो मधुरादिः धान्यं सप्त

श्री०
न०प०
ज०टी०
२४

नमित्यर्थः गजो हस्ती अश्वो चोरकः सर्वे चतुष्पदाः एतत्सर्वं महापीडां मृत्युं वा यातीति अत्र नामनक्षत्रे वेधे वाक्
रः स्थितः तदा वेधफलं वक्तव्यं यस्य द्रव्यस्य नामनक्षत्रं पापेन विद्धं क्रान्तं वा भवति तद्द्रव्यं महार्घं भवति प
रिशेषात् शुभग्रहवेधे स्वल्पमल्पं भवति मिश्रग्रहवेधे समार्घमिति ५५ टीका। क्रूरवेधे समायोगे यस्योपग्रहसंभवः ६२
तस्य मृत्युर्न संदेहो रोगाद्वापि रणेऽपि वा ५६ टीका यस्य जन्मर्क्षे क्रूरवेधसमायोगे सति उपग्रहसंभवो भवति तस्य रोगाद्र
णे वा मृत्युर्भवति अत्र न संदेहः ५६ उपग्रहानुपदर्शयति सूर्यभादिति टीका सूर्यभात्पञ्चमं धिष्ण्यमेवं वद्धनु(?)
मिधं शूलं चाष्टमिकं प्रोक्तं सन्निपातं चतुर्दशं ५७ टीका सूर्यभादित्यस्यार्थः प्राग्वत् सूर्याक्रान्तनक्षत्रात् पञ्चमं नक्ष
त्रं विद्युन्मुखाभिधं ८ शूलं १४ सन्निपातं १८ केतुः १२ उल्का २२ कंपः २३ वज्रं २४ सूर्यभादित्यस्य क्रमेणोक्ता एते उपग्र
हाः ५७ श्लोक केतुरष्टादशं प्रोक्तमुल्का स्यादेकविंशतिः द्वाविंशतितमं कंपस्त्रयोविंशतिवज्रकं ५८ नि
र्घातश्च चतुर्विंशं उल्काद्यानुपग्रहाः स्वस्थाने विद्युदाद्याः प्रोक्ताः सर्वे कार्येषु सर्वदा ५८ जन्मभं कर्मभं चाधानं वैनाशं सामु
दायिकं सांघातिकमिदं धिष्ण्यषट्कं सर्वजनीनकं ६० टीका नाडीनक्षत्रं कथयति जनेति सर्वस्य लोकस्य साधारणं
श्लोक जातिदेशाभिषेकैश्च नवधिष्ण्यानि भूपतेः वेधं नानाफलं बुद्धि सौम्यक्रूरैः शुभाशुभं ६१ टीका भूपतेः जाति
देशाभिषेकैः सह नव भानि सर्वेऽपि तत्र जातिनक्षत्रं पूर्वकथितं देशनक्षत्रं शतपदचक्रोक्तं नाम॰ अभिषेक
भं यस्मिन् राजाऽभिषिक्तः ६२ श्लोक जन्मभं जन्मनक्षत्रं दशमं कर्मसंज्ञकं एकोनविंशमाधानं त्रयोविंशं विनाश नाम २४
कं ६३ अष्टादशं च नक्षत्रं सामुदायिकसंज्ञितं सांघातिकं च विज्ञेयं नक्षत्रं षोडशं तथा हि ६४ षड्विंशं जातिनक्षत्रं
देशनाम सजातिभं देशभं देशनामर्क्षं राज्यर्क्षमभिषेकभं ६५ स्पष्टं नवनक्षत्राणि नृपतिरिति सर्वं मनुजं षड्विंशतिः

भेराज्यं जातमित्यनेन राज्यादशानक्षत्राणीति अत्र राज्यजातएव फलकथनात् अभिषेकनक्षत्रराज्यजातनक्ष
त्रयोर्विकल्पो ज्ञातव्यः तत्र पापग्रहवेधे प्रत्येकं फलमुपदर्शयति मृत्युरिति मृत्युः स्याज्जन्मभे विद्धे कर्मभे क्लेश एव च
आधाने स्यात्प्रवासः स्याद्वैनाशे बंधविग्रहः सामुदायिकभे निःस्वहानिः संघातके तथा जातिभे कुलनाशः स्याद्बंधनं
चाभिषेकके ६७ देशार्थे देशभंगः स्यात्क्रूरैरेवं शुभैः शुभं उपग्रहसमायोगे मृत्युर्भवति नान्यथा ६८ टीका विग्रहः क
लहो युद्धं वा अत्र अवनाडीनक्षत्रे पापग्रहे विद्धे उपग्रहसमायोगे सति सूर्यभात्पंचमभिस्युपग्रहमिलने सति मृत्युरिति
अन्यथा क्रूरफलमेवेत्यर्थः ६८ श्लोक नव्यं भंगः स्याद्धातः स्यान्मृत्युर्भंगयुतो मतिः क्रूरैकादिकपंचान्तैर्वेधे फलं भवेत् ६९
टीका एकादिपंचान्तैः क्रूरैरेकद्वित्रिक्रमेण नाडीनक्षत्रवेधे सति युद्धे फलं भवेत् यथा एकवेधे भयं द्विवेधे भंगः इत्या
दिनाडीनक्षत्रवेधे युद्धे नाहमित्यर्थः शुभाशुभवेधे सति यथाफलं स्यादित्यर्थः श्लोक त्रिष्वादिपंचके विद्धे चंद्रयोगे
[illegible]दा भवेत् उक्तं फलं तदा वाच्यं तद्दिने ग्रहसंभवं ७० टीका कथितव्यमानार्थमाह श्लोक अत्राष्टकोष्ठके स्यामि
यद्रूपं बुधस्त्यामले एकाशीतिपदे चक्रे ग्रहवेधे शुभाशुभं ७१ स्पष्टं देशे काले ततः पर एव मितिश्री एव ह्यनिर्णयः चिं
तनीयानि वेधानि सर्वकालं विचक्षणैः ७२ टीका देशभेदमुपदर्शयति श्लोक देशाश्च मंडलस्थान मितिदेशस्त्रिधो।
च्यते वर्षमासे दिने चेति त्रिधा कालोपि कथ्यते ७३ टीका मंडलं ग्रामोपलक्षितग्रामसमूहः स्थानं ग्रामविशेषाः
७३ श्लोक धातुर्मूलं च जीवं च इति पण्यं त्रिधा मतं अथ त्रिकत्रिकस्यात्र वर्गस्वामिसौम्यखेचरान् ७४ टीका धातुः
हेमादिः कृष्णान्तः मूलं वृक्षपत्रफलादिकं नद्विकारान्तं जीवो मनुष्यादिः कीटपर्यंतः अथानंतरं अत्र त्रिकत्रिकस्य
त्रिविधिं कृत्वा तत्र स्वामिखेचरान् स्वामिनो ग्रहान् वक्ष्यामि ७५ श्लोक देशेशाद्भूमंडेश्या मंडलस्वामिनः पुनः केतुस्

र्वस्थिताः स्वानतापाश्चं स्वरवंदताः ७५ वर्षेशाराहुकेत्वार्कि जीवामासाधिपंदुनः भौमार्कजसिताज्ञेयाश्चंद्रः स्याद्दिव 49
साधिपः ७६ धातीशाः शौरिपातारा जीवेशाज्ञेंदुभार्गवः मूलेशाः केतुसूर्याकौ इति वर्णाधिपा ग्रहाः ७७ शुक्रहाराहुके
नं०प्र तर्कजीवभूमिसुता मताः स्त्रीग्रहौ सितशीतांशू सौम्यसौरौ नपुंसकौ ७८ सितेंदू सितवर्णौ भौमरवी रक्तौ भौमभास्करौ पीतौ
नं०टी० सौम्यगुरू कृष्णा राहुकेतर्कजा मताः ७९ ग्रहे वक्रोच्चयोः स्वांशे उदये च बलाधिकाः देशादीनां मरैकैकाः स्वामी खेटस्तदा मताः
२५ ८० टीका ग्रहे तत्र राशौ यथा सिंहे सूर्यः वक्रो भुक्तांशोपरांशुगमने उच्चे रवेर्मेषः स्वांशे स्वनवांशे नवांशस्य विचारः स्फुटगणि
तागतकाल योगक्रमेण भुक्तकलानुशतहृद्धेन गृहीतभागाद्यवशिष्टकलाद्युपभोग्यमानं नवांशो यदि स्वांशस्थस्तथा सति
कालां प्रत्युद्यराशिनकशस्त्यनुसारेण मेष सिंह धनुः उदये सति बलाधिकोग्रहो भवति तदा यो ग्रह ईदृशो भवति स तस्य
देशाद्यधिपः मध्यदेशादीनां स्वामी भवति तथा च तद्बलान्विहृदेशाः कर्तव्या इति ८० श्लोक वक्रोदयस्य हर्म्येषु पूर्णवीर्यो
भवेद्ग्रहः तदर्धं स्थे खेटे च बलं त्रैराशिकं मतं ८१ टीका स्वगृहेषु वक्रोदयाः वक्री उदितः उदितग्रहाः पूर्णवीर्यः पूर्णव
लो भवेत् तस्मिन्नेव खेटे गृहे तदर्धं हृद्गे स्वराशे ''स्याद्रूतेमति ८१ श्लोक उच्चस्थे च बलं पूर्णं नीच तुस्थे बलं बलं ।
त्रैराशिकबलं ज्ञेयमंतरे कबलं बुधैः ८२ टीका उच्चस्थे ग्रहे पूर्णबलं नीचस्थे नीचभागस्थे ग्रहे र्धबलं तत् पुनः उच्चनीच
मध्ये त्रैराशिकानुपातात् हानिवृद्धिक्रमेण ज्ञेयं बलं त्रैराशिकन्यासो यथा पूर्णं दृष्या हिंशोपक अवस्थायां विंशतिः राम
तथा बलपूर्णतायां विंशति संख्या तत्र मेषदशांशे रविः पूर्णबलः तुलादशांशे सूर्यो हीनबलः तन्मध्ये षड्राशयः अशी २५
स्फुटा शताबंशा भवंति तावद्भिरंशैः पूर्णबलं विशिष्यांतरोदयक्रमेण षसरानुत्या यतदनुक्रमेण लिखितास्तत्र योगस्त
राद्दितः प्रत्येक बालक्रमादित्यवस्थाभिधाय पंचस्वरविंशोपकाः प्रत्येकं वतः स्थानेष्ववस्थिताः यथा बालोत्तराधर्द्वय
रा१

समये कुमारे हन्ति च प्रत्येकं च तस्य तत्तत्काला शुभराशिं परिकल्प्य । लिखित बालप्रथमार्धे समये वृद्धमते चतुः संख्या त्र्यक्षु 50
मेषाद्या राशयो नवभागाधि क वृश्चिक मीन कर्कादि तु कुं भि तुलादि म वृष कन्या मकरादिः इति राशय शोभको
ष्ठीलिखिता शुभराशेरशुभराशावेतयोरुदयो विशिष्यते तत्र नाम सदृशं फलं पदवशिष्यते तद्विंशत्या संगुण्य चतुः षष्ट्या
हरणात् यल्लब्धं तत्संख्या योगादिषु तेच स्वरावर्तमाना तस्य फलं योगे तत्कर्म तत इत्यादि ग्रंथकृतं वक्ष्यो चिंतनीयं य
था नरहरि नाम्नो मात्रायुक्त स्वरादिक्रमेण योगसरादि द्वादशाब्दादिक्रमे प्रवृत्तिः तेन प्रथमतो योगसरः व्यवस्थामेता
मर्हति तथापि मात्रा स्वरैः समन्व्यवस्था व्यतिरेकेण तस्य व्यवस्थानं भवतीति अत्र द्वादशांतरोदयो योगसराद्यधिकरणा
दि व्यवस्थायां योगसरः व्यवस्थामेतामर्हति तथापि मात्रा स्वरकारस्तदवधिको द्वादशेउदित इकारो बालस्य स्योन्नत ।
राधीमिति शुभराशौ द्विसंख्यापि उस्वर इकारः तदवधिको वर्षतदीयरकारो वृद्धः स्यात् दशभ कोटौ चतुः संख्या तत्र
स्वर एकारः तदवधिके यत्नेऽदितो कारो युवा शुभराशौ चतुः संख्या राशि स्वर एकारः तदवधिकमस्ता वुदित एकारो बा ।
लत्वस्योन्नत्राधीमिति शुभराशौ द्विसंख्या जीवस्वरोः कारः तदवधिको मासस्वर इकारः सकुमारत्वस्य शुभराशौ चतुः संख्या
मात्रा स्वरोऽकारस्तदवधिको छ्ली स्वरउदितोऽकारो बाला । तस्योन्नतार्धे शुभराशौ चतुः संख्या बालत्रयोन्नतार्धं तेन षड्संख्या
अर्धदर्शित मानुमतिय अत मेषदशांशा मारभ्य शोषग्रहा स्त्रिष्ठति कियतो बालस्य ह्रासः स्यादिति जिज्ञासायां रेखा विषयिका
योनमंशा फलं दशा व्यवहरन्ते ति शीति शतांशाः १८० इतीह्वा विषयेण फलेन गुणितो वह्नः १०० व्यवहत्या भागो गृहीते
लब्धं ५३३ एतावदंशका विंशतो ह्रसंति एवं नीचतगमनेऽधिको भवति एवमपरग्रहेष्वपि उच्चनीचांतरेष्वपि बलह्रासवृ
द्धी चिंतनीये इति रेखाफल गुणितं व्यवहृत्य भाजयेत् सम स्वंव्यवहृत्य गुणितं तत्र क्षाभ तं भवति त्रैराशिकमिति एवं देश

दिनाथाद्येत्रिविधेत्रिविधपदएनाथेचवेधोज्ञेयः तत्रप्रभृतविषयेदेशाधौ वेधचिंतावर्ज्या तत्रविद्धदेशाद्यधिपग्रहे 51
श्री॰ फलेवक्तव्यंयथाभूर्यो मंडलस्वामी तस्यमित्रैर्यदि मंडलंविद्धं तदशुभवद्भानांक्रमेणफलंवक्तव्यं तत्रसमफलंदेवुधः
नं॰ प॰ शत्रोर्वेधेनिषिद्धफलमेवक्रमेणसर्वत्रचिंतनीयं स्वमित्रेतिदेशाधिकेदेशमंडलेपएचस्वमित्रसमशत्रूणांस्वमित्रस्य
जं॰ टी॰ समस्यशत्रोश्चवेधः शुभाशुभफलंददाति चतुस्त्रिद्व्येकपादकैः दृष्टेसतिबलंज्ञेयं यथास्वकीयदृष्टौसत्यांपूर्णफलंमि
२६ त्रवेधेपादोनं समवेधेर्धं शत्रुवेधेपादफलंदेशाधिपादेः शुभग्रहोयदिशत्रुः तदास्तनशुभः फलंनिषिद्धमेवेति ८४ श्लो
सं॰ ५६ कः एवंदेशाधिनाथाश्चवेधोग्रहंप्रति स्वदृष्टः शत्रवोमध्याश्चिंतनीयाः प्रयत्नतः ८४ पूर्वटीका समित्रसमशत्रूणां श्री ५६
८ वेधोदेशाधिकं क्रमात दृष्टेदृष्टग्रहः कुर्यादेकद्वित्रिचतुष्पदैः ८५ टीका स्वपदिनदेशाधिपोग्रहउच्यते मित्रसमशत्रू
णां मध्येदृष्टादिफलक्रमादेकद्वित्रिचतुःपाददृष्ट्याः नुमानेकुर्यात अयमर्थः यस्यदेशादेर्नोमराशिर्विद्धो भव
ति मेषादिद्वादशराशिचक्रे यावत्पाददृष्ट्या दृश्यते तावदेव स्वरूपं शुभं वा फलं ते तद्ग्रहेणात्रतत्रदीयते इति वि
शेषकपरिकल्पनाप्येवमग्रेचिंतनीया ८५ श्लोक विद्धंपूर्णदृशापश्यं[illegible]पादेनफलंग्रहः विदधात्यन्यथाज्ञेयं
फलंदृष्ट्यानुमानतः ८६ टीका विद्धमितिग्रहःपूर्णदृष्ट्यापश्यन्तत्राशयस्तं यदिविद्धं भवति तदापादेनफलंवि
दधाति एवंदृष्ट्यानुमानेनज्ञेयं न्यथाविपरीतक्रमेणफलंज्ञेयं तथाहि पूर्णदृष्ट्या एकेनपादेन तदापादफलेपादत्र राम
यदृष्ट्यार्धफलंद्विपाददृष्ट्यापादोनफलंपाददृष्ट्यापूर्णफलमितिज्ञेयं ८६ श्लोक वर्णादिस्वरराशीनां मेषाद्येरा २६
शिमंडले ग्रहदृष्टिवशाद्वेधत्रयं वर्णादिकेमतं ८७ टीका मेषाद्येराशिमंडले द्वादशराशिचक्रे वर्णस्वरादिभूतोये
षांतेषां स्वराणां अरउएन्त्ये तेषां वर्णचक्रात रविबुधावेवक्रमेणनवांशकव्यवस्थापितराशीनां शुभदृष्टिवशा

द्वेधः फलदायकः सोपि वेधो [illegible] वर्णादिके यत्रांशकचक्रे नवांशकवेधः तत्र तन्नवांशकवर्णस्वरयो 52
रेववेधः तत्रापि फलं सिद्धं नवांशकराशेर्ग्रहस्य दृष्टि [illegible] नमेषादिराशिचक्रमिति ८७ श्लोक स्वरवर्णस्था
चोक्ता लिपिवेधश्चापीरयन् तिथौ वर्णे च राशौ च सदृष्ट्या दृष्टिजं फलं ८८ शुभो वाशुभो वापि शुक्रे वेधगाति।
योग्रहः सर्वं निजफलं दत्ते कृष्णपक्षे तु तत् दलं ८८ खेटकस्यांशके नैव स्यात् पूर्णदृष्टिः सदा बुधैः दृष्टिहीने पुनर्वे
धे न स्यात् किंचित् शुभाशुभं ८० टीका खेटेति खेटस्य ग्रहस्य स्वांशके दृष्टिः पूर्णा बुधैर्नैव चिंतनीया दृष्टिहीने
वेधे ॥ पुनः किंचित् शुभाशुभं फलं न स्यात् इति हेतुगर्भवाक्यं ८० श्लोक इत्येवं दृष्टिभेदेन निर्दिष्टं सकलं फ
लं वर्णादिपंचके वेधे ग्रहो दत्ते शुभाशुभं ८१ टीका वर्णपंचके वर्णस्वरनक्षत्रराशितिथ्यात्मके विद्धे वसति वेध
कर्ता ग्रहः शुभाशुभं फलं दत्ते ८१ श्लोक सौम्यः पूर्णदृशा पश्यन् विद्धवर्णादिपंचके फलं विंशोपकाः पंच क्रूरश्च
तुरो दिशेत् ८२ टीका सर्वतोभद्रचक्रे पूर्णदृशा वर्णादिपंचके सौम्यः पूर्णदृष्ट्या पश्यन् विध्यन् फलं तत्र पंच
विंशोपकाः पंच विंशोपकान् शुभग्रहो ददाति इत्यर्थः क्रूरग्रहः पश्यन् चतुरो विंशोपकान् ददातीति कृत्तिकादिसप्त श्लोक ६
भानां राशिर्वृषादिकः स्मृतः मघादिसप्तभानां च राशिः सिंहादिकः स्मृतः मैत्रादिसप्तभानां च वृश्चिकादित्रयं स्मृ
तं धनिष्ठादिकभानां च कुंभादित्रितयं स्मृतं ८४ टीका वृषादित्रये अवकहडा वर्णाः सिंहादित्रये मटपरताः वृ
श्चिकादित्रये नयभजखा कुंभादित्रये दशाबला वर्णाः एवं नक्षत्रादि वर्णराशीनां ग्रहा यदि पश्यंति तदा पाद
दृष्ट्यादिकल्पनया विंशोपकाः स्युः प्रतिपादं शुभग्रहे पंचैव चाशुभग्रहे चतुरो विंशोपका इति ज्ञेयं ८५ श्लोक ॥ वे
धे वर्णादिके यावत् स्यान्न वेधे च यावती दृष्टिस्तदनुमानेन वाच्या विंशोपका बुधैः ८५ टीका वर्णादिपंचके वेधे सति

पावद्दृष्टस्तथास्यानवेधे चयावतीरष्टिः तदनुमानेन बुद्धैः पंडितैः विंशोपकाबोध्याः ६३ श्लोक एवंविंशोपकायत्र सं 53
श्री० भवंति शुभाशुभाः अन्येषां शोधयेत्तेषां शेषं तेषु शुभाशुभं ६४ टीका एवमितिच्छनेन प्रकारेण यत्र शुभाशुभा विंशोप
ज्यो० प० काः संभवंति शुभग्रहकृता अशुभग्रहकृताश्च विंशोपका भवंति तत्र शुभग्रहकृता विंशोपका एकतः स्थाप्याः अशु
ज० टी० भग्रहकृता अपरत्र कार्याः तेषां मध्ये अन्योन्यं परस्परं शोधयेत् न्यूना भवंति ते धिके शोधनीयाः शेषं यद्दृष्टि विदितं शु
४ भमशुभं वा फलं वाच्यं अत्र यावती दृष्टिरित्यस्यार्थं विविच्य लिख्यते तृतीये दशमे पंच विंशोपकाः नवमे पंचमे दश
विंशोपकाः चतुर्थेष्टमे पंचदश सप्तमे सप्तके विंशतिं तथा च वराहाचार्यः दशमत्रतीये नवपंचमे च चतुर्थाष्टमे कलत्रं च प श्लोक ६२
२० श्यंति पादवृद्ध्या फलानि चैव प्रयच्छंति एवं क्रूरग्रहाणामेकैकचरणवृद्ध्या विंशोपका जायंते तत्र शुभग्रहाणां प्रतिपादं पंच
विंशोपकाः क्रूरग्रहाणां प्रतिपादं चत्वारो विंशोपकाः एवं क्रमेण शुभग्रहाणां विंशतिः क्रूरग्रहाणां षोडश विंशोपकाः
पूर्णदृष्ट्या भवंति तत्र यावंतः शुभग्रहकृता विंशोपका यावंतश्चाशुभग्रहकृता भवंति तांश्च पृथक् पृथक् संलिख्य तत्र
येन्यूना विंशोपका भवंति तेऽधिकेषु पातनीयाः तत्र शुभग्रहविंशोपकशेषे शुभं फलं वक्तव्यं अशुभग्रहशेषे अशुभं फलं
तेषं बलक्रमेण विमृश्यः ६४ श्लोक वर्तमानाद्विंशोपकल्पना तेषु चक्रमात् वर्तमानाद्वेद्याऽस्याद्यं च शुभाशुभं
६५ टीका वर्तमाने तितेषु विंशपदव्येषु वर्तमान धान्यादि मूले तत्तन्मानेन स्वस्वखर्णादिति स्थिरा शिवे धेन सर्वप्रका राम ३
रेण विंशांशपरिकल्पना ततो न्यूनपरिशोधनपर्यंतं कार्या ततो व शिष्ट विंशोपकपरिकल्पते न शुभग्रहदृष्टे विंशकं न्यूने
पति विशेषेऽहीनागोऽधिके चिंतनीयं क्रूरविंशोपकशेषेऽवक्रमेण द्विआदि विंशांशभाग न्यूनेऽधिके क्रियते
न्यूनमप्यधिकं भवति शुभाशुभं चोत्पाद्यं एवं पत्रदेशादौ पापग्रहवेधस्ततो शुभं किंचिद्दुर्लभत्वेव चेतावितनीयं

यत्र च देशादेर्वर्णादिपंचकं शुभमात्रेण विद्धं तत्रातीव शुभं यत्र पापग्रहेण विद्धं तत्रातीवाशुभं यत्र शुभाशुभवेधो भवेत्
तत्र दृष्टिभेदेन विंशोपकान्यधिकत्वम् शुभाशुभग्रह विंशोपकविशेषात् शुभमशुभं च फलं वक्तव्यं ९५ श्लोक देशध्वंसः दुःखानी
ज्ञानृपतिपूर्वपल्लवा यत्र वेधश्च तत्र स्यात् दुर्भिक्षं मंडलेस्फुटं ९६ टीका अथ शुभग्रहवेधफलमाह देशेति यत्र कथितप्रका
रेण पूर्णदृष्ट्या क्रूरवेधः संपद्यते तत्र देशध्वंसः कूर्मचक्रे पापग्रहपीडा तस्मात्सर्वतोभद्रचक्रे पापग्रहवेधो भवेत् त
त्रावश्यं देशविनाशादिफलं भवेत् अन्यदपि शकुननिमित्तार्थं दर्शयति अकालेति ९६ श्लोक अकालेपि फलं पुष्पं व
न्ध्यायां यत्र जायते स्वजातिमांसभुक्तिश्च दुर्भिक्षं तत्र रौरवं ९७ टीका यत्र देशादौ अकालेऽन्यसमये वृक्षाणां पुष्पं फलं च
भवति यथा वसंते ये वृक्षाः पुष्पंति फलंति वा स चेत् ग्रीष्मे स्वजातीति मनुष्यो मनुष्यमांसं एवमन्येपि परस्परं रौरवं भयक
रं यत्रैवं तत्र परचक्रागमोपीति ९७ श्लोक अतो विपर्ययो यत्र दुर्भिक्षं मंडलं भवेत् परचक्रागमस्तत्र दुर्भिक्षं च सराजके
९८ टीका यथा ग्रीष्मे शैत्यादि शिशिरतो बुष्णतादि तत्र दुर्भिक्षं ९८ श्लोक भूमिकंपो रजः पातो रक्तवृष्टिश्च जायते देशे
सर्वसुखोपेते दीर्घवेधो भवेद्यदि ९९ टीका सर्वसुखोपेते यत्र देशे दीर्घः पापग्रहकृतो वेधो भवति तत्र भूकंपादि अथ सर्व
